

त्रयोदशः पाठः

# सुभाषितानि

पुस्तकस्था तु या विद्या परहस्तगतं धनम्।
कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम् ॥1॥

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम्।
श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम् ॥2॥

न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद् रिपुः।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ॥3॥

विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥4॥

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ॥5॥

# शब्दार्थाः



| | | |
|---|---|---|
| **पुस्तकस्था** | – | पुस्तक में विद्यमान |
| **परहस्तगतम्** | – | दूसरों के हाथ में गया हुआ |
| **कार्यकाले समुत्पन्ने** | – | समय आने पर |
| **श्रोत्रस्य** | – | कान का/के/की |
| **किं प्रयोजनम्** | – | क्या मतलब/प्रयोजन |
| **कश्चित्** | – | कोई |
| **कस्यचित्** | – | किसी का |
| **रिपुः** | – | शत्रु |
| **व्यवहारेण** | – | व्यवहार के द्वारा/से |
| **जायन्ते** | – | होते हैं/होती हैं/बनते हैं/बनती हैं |
| **तुल्यम्** | – | समान |
| **सर्वत्र** | – | सब जगह |
| **पूज्यते** | – | आदर का पात्र होता है/होती है/पूजा जाता है/जाती है |
| **भवन्तु** (भू, लोट्) | – | बनें |
| **सन्तु** (अस्, लोट्) | – | हों |
| **निरामयाः** | – | नीरोग |
| **भद्राणि** | – | कल्याण को/कल्याण |
| **पश्यन्तु** (दृश्, लोट्) | – | देखें |
| **मा कश्चित्** | – | न कोई |
| **दुःखभाक्** | – | दुःख का भागी |
| **भवेत्** | – | हों |

## अभ्यासः



1. **पाठे दत्तानां श्लोकानां वाचनं कुरुत-**
2. **श्लोकांशान् यथोचितं योजयत-**

| क | ख |
|---|---|
| परहस्तगतं धनम् | कस्यचिद् रिपुः |
| श्रोत्रस्य भूषणम् | नैव तुल्यं कदाचन |
| न कश्चित् | शास्त्रम् |
| विद्वत्त्वं च नृपत्वं च | दुःखभाग् भवेत् |
| मा कश्चित् | न तद् धनं भवति |

3. **श्लोकांशेषु रिक्तस्थानानि पूरयत-**

(क) कार्यकाले समुत्पन्ने ........................................।

(ख) ........................................ सत्यं कण्ठस्य भूषणम्।

(ग) व्यवहारेण मित्राणि ........................................।

(घ) ........................................ विद्वान् सर्वत्र पूज्यते।

(ङ) सर्वे भवन्तु सुखिनः ........................................।

4. **शुद्धकथनानां समक्षम् 'आम्', अशुद्धकथनानां समक्षं 'न' इति लिखत-**

(क) पुस्तकस्था विद्या कार्यकाले विद्या भवति। ☐

(ख) हस्तस्य भूषणं दानम्। ☐

(ग) राजा सर्वत्र पूज्यते।

(घ) विद्वत्त्वं च नृपत्वं च तुल्यं भवति।

(ङ) सर्वे भद्राणि मा पश्यन्तु।

## 5. प्रश्नानाम् उत्तराणि लिखत-

(क) पुस्तकस्था विद्या कदा विद्या न भवति?

(ख) कण्ठस्य भूषणं किं भवति?

(ग) मित्राणि केन जायन्ते?

(घ) कः सर्वत्र पूज्यते?

(ङ) सर्वे कानि पश्यन्तु?

## 6. विलोमशब्दान् योजयत-

| | |
|---|---|
| विद्या | रिपुः |
| सत्यम् | विदेशः |
| मित्रम् | असत्यम् |
| स्वदेशः | दुःखिनः |
| सुखिनः | अविद्या |